पारदारिकः, पुं, (परेषां अन्येषां दारान् गच्छतीति। परदार+"गच्छती परदारादिभ्यः।"४।४।७। इत्यस्य वार्त्तिकोक्त्या ठक्।) पारजायिकः। परदाररतः। (यथा, महाभारते।२।३१।२५।
"तत्र माहिष्मतीवासी भगवान् हव्यवाहनः।
श्रूयते हि गृहीतो वै पुरस्तात् पारदारिकः॥")
"पृथ्वकाण्डजयडिण्डिमायितं
यत्र गोतमकलत्रकामिनः।
पारदारिकविलाससाहसं
देवभर्त्तुरुदटङ्कि भित्तिषु॥"
इति च नैषधे १८ सर्गः॥
अस्य दोषा यथा,—
"यः परस्त्रीषु निरतस्तस्य श्रीर्वा कुतो यशः।
स च निन्द्यः पापयुक्तः शश्वत् सर्व्वसभासु च॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे २१ अध्यायः॥

पारदार्य्यं, क्ली, (परदारा दारा यस्य स परदारस्तस्य कर्म्मेति ष्यञ्।) परदारगमनम्। यथा,
"भृताध्ययनादानं भृतकाध्यापनन्तथा।
पारदार्य्यं पारिवित्तं वार्धुष्यं लवणक्रिया॥"
इत्युपपातकगणने याज्ञवल्क्यः॥

पारदेश्यः, त्रि, प्रोषितः। पारदेशिकः। पथिकः। परदेशं गत इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नः॥ (परदेशे भव इति ष्यञ्। परदेशजातः। यथा, याज्ञवल्क्ये।२।२५५।
"स्वदेशपण्ये तु शतं वणिग्गृह्णीत पञ्चकम्।
दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी॥")

पारमहंस्यं, त्रि, (परमहंसैर्गन्तव्यं परमहंसस्य भावः परमहंसेन श्रेयं यत् प्राप्यमिति वा। परमहंस+ष्यञ्।) परमहंससम्बन्धि। यथा,
"श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं
यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते।
यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्म्यमाविष्कृतं
तच्छृण्वन् सुपठन् विचारणपरो भक्त्या विमुच्येन्नरः॥"
इति श्रीमद्भागवते।१२।१३।१८॥
"पारमहंस्यं परमहंसैः प्राप्यम्।" इति तट्टीकायां श्रीधरस्वामी॥ (परब्रह्मधाम। यथा, भागवते।१।१८।२२।
"यत्रानुरक्ताः सहसैव धीरा
व्यपोह्य देहादिषु सङ्गमूढम्।
व्रजन्ति तत्पारमहंस्यमन्त्यं
यस्मिन्नहिंसोपशमः स्वधर्म्मः॥"
प्रत्यङ्निष्ठारूपम्। यथा, तत्रैव।२।४।१२।
"पुंसां पुनः पारमहंस्य आश्रमे॥
व्यवस्थितानामनुकल्पदाशुषे॥"
ज्ञानस्वरूपम्। यथा, तत्रैव।४।२१।४२।
"न वै तथा चेतनया बहिष्कृते
हुताशने पारमहंस्यपर्य्यगुः॥")

पारमार्थिकः, त्रि, (परमार्थाय परमपुरुषार्थाय हित इति। ठक्।) परमार्थयुक्तः। यथा,—
"गतानुगतिको लोको न लोकः पारमार्थिकः॥"
इति पुराणम्॥
सत्यम्। यथा,—
"त्रिचतुःपञ्चसप्ताष्टनवद्वादश एव च।
क्रमेण घटिका ह्येतास्तत्पूर्व्वं पारमार्थिकम्॥"
इति तिथ्यादितत्त्वम्॥
(यथार्थः। यथा, मनौ ८। ६२ श्लोकटीकायां कुल्लूकभट्टः। "तेषां प्रकाशाप्रकाशतस्कराणां स्वकर्म्मेषि चौर्य्यादौ ये पारमार्थिका दोषा इति।" परस्परविभक्तः। यथा, भागवते।३।२६।१।
"लक्षणं महदादीनां प्रकृतेः पुरुषस्य च।
स्वरूपं लक्ष्यतेऽमीषां येन तत् पारमार्थिकम्॥"
"पारमार्थिकं परस्परविभक्तमित्यर्थः।" इति तट्टीकायां श्रीधरस्वामी॥)

पारम्पर्य्यं, क्ली, (परम्पराया आगतम्। तत आगत इत्यण्। चतुर्वर्णादित्वात् ष्यञ्। परम्परा+स्वार्थे ष्यञ् वा।) आम्नायः। कुलक्रमः। इति हेमचन्द्रः॥ तथा च।
"यस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः।
तत्र तं नावमन्येत धर्म्मस्तत्रैव तादृशः॥"
इति विवादभङ्गार्णवः॥
परम्पराया भावश्च॥ (यथा, महाभारते।६।११७।२७।
"निहतेषु च सैन्येषु पारम्पर्य्येण सर्व्वशः।
विमुक्तकवचाः सर्व्वे भीष्ममीयुर्नराधिपाः॥")

पारम्पर्य्योपदेशः, पुं, (पारम्पर्य्येण गुरुपरम्परया प्राप्त उपदेशः।) उपदेशपरम्परा। तत्पर्य्यायः। ऐतिह्यम् २ इतिह ३। इत्यमरः।२।७।१२॥ परम्परैव पारम्पर्य्यं स्वार्थे ष्यञ्। पारम्पर्य्येणोपदेशः पारम्पर्य्योपदेशः तत्र इतिहशब्दोऽव्ययः। यथा। इतिह वृद्धैरुक्तं इह वटे यक्षः प्रतिवसतीति। इति एवं रूपं हन्ति गच्छति इतिह हनजनादिति डः। इतिह शब्दात् स्वार्थे ष्णे ऐतिह्यम्। इति भरतः॥

पारलौकिकः, त्रि, (परलोके भवः परलोकाय हित इति वा। परलोक+ठञ्। "अनुशतिकादीनाञ्च।"७।३।२०। इति भित्त्वाद्भयपदस्यैव वृद्धिः।) परलोकसम्बन्धी। यथा,—
"दानपात्रमधमर्णमिहैक-
ग्राहि कोटिगुणितं दिवि दायि।
साधुरेति सुकृतैर्यदि कर्त्तुं
पारलौकिककुसीदमसीदत्॥"
इति नैषधे।५।८२॥
(यथा च महाभारते।१३।१११।१६।
"तस्मात्न्यायागतैरर्थैर्धर्म्मं सेवेत पण्डितः।
धर्म्म एको मनुष्याणां सहायः पारलौकिकः॥")

पारवतः, पुं, पारावतः। इति द्विरूपकोषः॥

पारशवः, पुं, शूद्रायां विप्रतनयः। इत्यमरः।३।३।२०८॥ स तु निषादजातिः। यथा,—
"ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते।
निषादः शूद्रकन्यायां यः पारशव उच्यते॥
शूद्रकन्यायामूढायां निषाद उत्पद्यते यतः संशान्तरेण पारशवश्चोच्यते। तस्योपनयनसंस्कारनिषेधमाह।
"स पारयन्नेव शवस्तस्मात् पारशवः स्मृतः॥
स जीवन्नेव शवतुल्यः।" इति मनुकुल्लूकभट्टौ॥
परस्त्रीतनयः। (परशुरेव स्वार्थे अण्।) शस्त्रम्। तत्तु लौहम्। इति मेदिनी। वे,६०॥ परशुजाते, त्रि॥

पारशीकः, पुं, पारसीकः। इत्यमरटीकायां रमानाथः॥

पारश्वधः, पुं, (परश्वधेन युध्यतेऽसौ परश्वधः प्रहरणमस्येति वा। परश्वध+"तदस्येति।" अण्।) परश्वधधारी। पारश्वधिकः। इति हेमचन्द्रः॥

पारश्वधिकः, पुं, (परश्वधः प्रहरणमस्य। "परश्वधाट्ठञ् च।" ४।४।५८। इति ठञ्।) परशुहेतिकः। कुठारधारी। तत्पर्य्यायः। पारश्वधः २ परश्वधायुधः ३। इति हेमचन्द्रः॥

पारसिकः, पुं, पारसीकः। इति शब्दरत्नावली॥

पारसी, स्त्री, पारस्यभाषा। पारस्यदेशभवविद्यादि। तदारम्भदिनं यथा,—
"ज्येष्ठाश्विमघापूर्व्वारेवतीभरणीद्वये।
विशाखार्द्रोत्तराषाढ़शतभे पापवासरे॥
लग्ने स्थिरे सचन्द्रे च पारसीमारबीं पठेत्॥"
इति गणपतिमुहूर्त्तः॥

पारसीकः, पुं, पारसीकदेशोद्भवघोटकः। तत्पर्य्यायः। वानायुजः २। इति केचिदित्यमरटीकायां भरतः॥ परीदनः ३ आवट्टजः ४। इति त्रिकाण्डशेषः॥ (यथा, अश्ववैद्यके।६।८।
"पारसीकास्तान्त्रिकाभाः कौङ्कणाः केचिदुन्नताः॥")
देशविशेषः। तत्पर्य्यायः। पारसिकः २। इति शब्दरत्नावली॥ तद्देशोद्भवे, त्रि॥ (यथा, रघुः।४।६०।
"पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना॥")

पारस्त्रैणेयः, त्रि, (परस्त्रियां जातः।"कल्याण्यादीनामिनङ्।" ४।१।१२६। इति ढक् इनङादेशश्च। तत उभयपदवृद्धिः।) परस्त्रियाः सुतः। इत्यमरः।२।६।२४॥

पारा, स्त्री, (पारोऽस्त्यस्या इत्यच् ततष्टाप्।) नदीविशेषः। सा तु पारिपात्रपर्व्वतोद्भवा। इति मेदिनी। रे,५६॥ (यथा, मात्स्ये।११३।२४।
"पारा चर्म्मण्वती रूपा विदुषा वेणुमत्यपि॥")

पारापतः, पुं, (पारे भित्तिनद्यादिपरपारे यद्वा, पारादप्यापतति लोभादिति। पत+अच्।) पारावतः। इत्यमरटीकायां रमानाथः॥

पारापारः, पुं, (पारञ्चापारञ्चास्त्यस्येति। "अर्श आदिभ्योऽच्।" ५।२।१२७। इत्यच्।) पारावारः। इति द्विरूपकोषः॥

पारायणं, क्ली, साकल्यवचनम्। इत्यमरः।३।२।२॥ "पारं समाप्तिं अयते गच्छति प्राप्नोति पारायणं नन्द्यादित्वादनः। आविष्टलिङ्गत्वाद्भिन्नलिङ्गेन सामानाधिकरण्येऽपि क्लीबमेव पारायणम्। यथा धातुपारायणम्। रम-